# Shri Jagannatha Saptakam

# શ્રીજગન્નાથસપ્તકમ્

## Document Information

Text title : jagannAthasaptakam

File name : jagannAthasaptakam.itx

Category : saptaka, vishhnu, jagannatha, vishnu, pradIptakumArananda, krishna

Location : doc_vishhnu

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : June 20, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીજગન્નાથસપ્તકમ્

પ્રકાશકાન્તચિન્મયં પ્રસન્નદારુવિગ્રહં
    પ્રફુલ્લફુલ્લસુન્દરં પુરીપ્રમોદમન્દિરમ્ ।
વિષાણુસઙ્ઘશોષિણં વિશાલવૈદ્યઘોષિનં
    સહાસ્યગોલલોચનં મહાપ્રભું ભજામ્યહમ્ ॥ ૧॥

પરમ્પરાવિમણ્ડિતં તટે વટે મઠે રતં
    મહાપ્રસાદમજ્જિતં મહાનુભાવસજ્જિતમ્ ।
સુવર્ણકીર્ણનિર્જિતં સમન્દમન્દહાસિતં
    પહણ્ડિનૃત્યપણ્ડિતં જગદ્ગુરું ભજામ્યહમ્ ॥ ૨॥

ત્રિતાપપાપનાશકં ત્રિધાતુદોષઘાતકં
    સુપઞ્ચભૂતશોધકં વિષાણુવેગરોધકમ્ ।
નિતાન્તશાન્તિદાયકં મહાર્તિનાશકારકં
    સદા જગત્સુરક્ષકં મહાપ્રભું ભજામ્યહમ્ ॥ ૩॥

રથે કદાપિ સત્વરં વિચિત્રવીર્યમીશ્વરં
    મુખારવિન્દસિન્દૂરં સગદ્ગદં સુધાસરમ્ ।
મહાપુરાણસત્કરં મહેશ્વરીપુરઃસરં
    સઘોષહર્ષતત્પરં સદાશિવં ભજામ્યહમ્ ॥ ૪॥

નિવાસનીલપર્વતં પ્રફુલ્લપીતસત્પટં
    સમસ્તવૈષ્ણવાશ્રિતં સમુદ્રકૂલનિર્જિતમ્ ।
નિતાન્તશાન્તચિદ્ઘનં ઘનાઘનપ્રભાયુતં
    નિયન્તૃરોગભૌતિકં ભિષગ્વરં ભજામ્યહમ્ ॥ ૫॥

ગ્રહેશદર્પહારિણં ખગેશયાનચારિણં
    નૃશંસ-કંસમર્દનં સમસ્તગોપશાસનમ્ ।
સરાગરાધિકાધવં કૃપાલુનીલમાધવં
    નવીનયૌવનોજ્વલં ભજે નિચોલમુજ્જ્વલમ્ ॥ ૬॥

નિયોગભોગભક્ષણં વિયોગવેગમર્ષણં
    સુપુષ્પહારધારિણં ચરાચરસ્ય પારિણમ્ ।
સમન્ત્રતન્ત્રનાયકં  પ્રવીણવેણુવાદકં
    વિષાણુમુક્તિદાયકં ભજે સુખપ્રદાયકમ્ ॥ ૭॥

ઇતિ પ્રદીપ્તનન્દશર્મવિરચિતં શ્રીજગન્નાથસપ્તકં સમ્પૂર્ણમ્ ।

Composed, encoded, and proofread by

Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

*Shri Jagannatha Saptakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*